# Navagraha dhyana mantra from Sadhu sankuli tantra

# નવગ્રહ ધ્યાન મન્ત્રાઃ સાધુસઙ્કુલિ તન્ત્રાન્તર્ગતમ્

## Document Information

Text title : navagraha dhyana and mantra from Sadhu sankuli tantra

File name : navagrahadhyAnasadhusankuli.itx

Category : navagraha, stotra, dhyAnam

Location : doc_z_misc_navagraha

Author : traditional

Transliterated by : Sanjay Rath srath at vsnl.com, Sarbani Sarkar

Proofread by : Sanjay Rath srath at vsnl.com, K. S. Ramachandran are needed for devanaagarii output and formatting.

Latest update : April 21, 2003, June 25, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

Navagraha dhyana mantra from Sadhu sankuli tantra

# નવગ્રહ ધ્યાન મન્ત્રાઃ સાધુસઙ્કુલિ તન્ત્રાન્તર્ગતમ્

ગ્રહપુરશ્ચરણ પ્રયોગઃ

ૐ રક્તપદ્માસનં દેવં ચતુર્બાહુસમન્વિતમ્ ।
ક્ષત્રિયં રક્તવર્ણઞ્ચ ગોત્રં કાશ્યપસમ્ભવમ્ ॥

સપ્તાશ્વરથમારૂઢં પ્રચણ્ડં સર્વસિદ્ધિદમ્ ।
દ્વિભુજં રક્તપદ્મૈશ્ચ સંયુક્તં પરમાદ્ભુતમ્ ॥

કલિઙ્ગદેશજં દેવં મૌલિમાણિક્યભૂષણમ્ ।
ત્રિનેત્રં તેજસા પૂર્ણમુદયાચલસંસ્થિતમ્ ॥

દ્વાદશાઙ્ગુલ-વિસ્તીર્ણં પ્રવરં ઘૃતકૌશિકમ્ ।
શિવાધિદૈવં પુર્વાસ્યં બ્રહ્મપ્રત્યધિદૈવતમ્ ॥

ક્લીં ઐં શ્રીં હ્રીં સૂર્યાય નમઃ ।

ૐ શુક્લં શુક્લામ્બરધરં શ્વેતાબ્જસ્થં ચતુર્ભુજમ્ ।
હારકેયૂરનૂપુરૈર્મણ્ડિતં તમસાપહમ્ ॥

સુખદૃશ્યં સુધાયુક્ત-માત્રેયં વૈશ્યજાતિજમ્ ।
કલઙ્કાઙ્કિતસર્વાઙ્ગં કેશપાશાતિસુન્દરમ્ ॥

મુકુટૈર્મણિમાણિક્યૈઃ શોભનીયં તુ લોચનમ્ ।
યોષિત્પ્રિયં મહાનન્દં યમુનાજલસમ્ભવમ્ ॥

ઉમાધિદૈવતં દેવમાપપ્રત્યધિદૈવતમ્ ॥

હ્રીં હ્રીં હું સોમાય સ્વાહા ।

ૐ મેશાધિરૂઢં દ્વિભુજં શક્તિચાપધરં મુદા ।
રક્તવર્ણં મહાતેજં તેજસ્વીનાં સમાકુલમ્ ॥

રક્તવસ્ત્રપરિધાનમ્ નાનાલઙ્કારસંયુતમ્ ।

રક્તાઙ્ગં ધરણીપુત્રં રક્તમાલ્યાનુલેપનમ્ ॥

હસ્તે વારાહદશનં પૃષ્ઠે તૂણસમન્વિતમ્ ।
કટાક્ષાદ્ ભીતિજનકં મહામોહપ્રદં મહત્ ॥

મહાચાપધરં દેવં મહોગ્રમુગ્રવિગ્રહમ્ ।
સ્કન્દાદિદૈવં સૂર્યાસ્યં ક્ષિતિપ્રત્યધિદૈવતમ્ ॥

હ્રીં ૐ ઐં કુજાય સ્વાહા ।

ૐ સુતપ્તસ્વર્ણાભતનું રોમરાજિવિરાજિતમ્ ।
દ્વિભુજં સ્વર્ણદણ્ડેવ શરચ્ચન્દ્રનિભાનનમ્ ॥

ચરણે રત્નમઞ્જીરં કુમારં શુભલક્ષણમ્ ।
સ્વર્ણયજ્ઞોપવીતઞ્ચ પીતવસ્ત્રયુગાવૃતમ્ ॥

અત્રિગોત્રસમુત્પન્નં વૈશ્યજાતિં મહાબલમ્ ।
માગધં મહિમાપૂર્ણં દ્વિનેત્રં દ્વિભુજં શુભમ્ ॥

નારાયણાધિદૈવઞ્ચ વિષ્ણુપ્રત્યધિદૈવતમ્ ।
ચિન્તયેત્ સોમતનયં સર્વાભિષ્ટફલપ્રદમ્ ॥

ૐ ક્લીં ૐ બુધાય સ્વાહા ।

ૐ કનકરુચિરગૌરં ચારુમૂર્તિં પ્રસન્નં
    દ્વિભુજમપિ સરજૌ સંદધાનં સુરેજ્યમ્ ।
વસનયુગદધાનં પીતવસ્ત્રં સુભદ્રં
    સુરવરનરપુજ્યમઙ્ગિરોગોત્રયુક્તમ્ ॥

દ્વિજવરકુલજાતં સિન્ધુદેશપ્રસિદ્ધં
    ત્રિજગતિ ગણશ્રેષ્ઠશ્ચાધિદૈવં તદીયમ્ ।
સકલગિરિનિહન્તા ઇન્દ્રઃ પ્રત્યાધિદૈવં
    ગ્રહગણગુરુનાથં તં ભજેઽભીષ્ટસિદ્ધૌ ॥

રં યં હ્રીં ઐં ગુરવે નમઃ ।

ૐ શુક્લામ્બરં શુક્લરુચિં સુદીપ્તં
    તુષારકુન્દેન્દુદ્યુતિં ચતુર્ભુજમ્ ।
ઇન્દ્રાધિદૈવં શચીપ્રત્યાધિદૈવં
    વેદાર્થવિજ્ઞં ચ કવિં કવીનામ્ ॥

ભૃગુગોત્રયુક્તં દ્વિજજાતિમાત્રં
    દિતીન્દ્રપૂજ્યં ખલુ શુદ્ધિશાન્તમ્ ।
સર્વાર્થસિદ્ધિપ્રદમેવ કાવ્યં
    ભજેઽપ્યહં ભોજકતોદ્ભવં ભૃગુમ્ ॥

હું હું શ્રીં શ્રીં નં રં શુક્રાય સ્વાહા ।

ૐ સૌરિં ગૃધ્રગતાતિકૃષ્ણવપુષં કાલાગ્નિવત્ સઙ્કુલં
    સંયુક્તં ભુજપલ્લવૈરુપલસત્સ્તમ્ભૈશ્ચતુર્ભિઃ સમૈઃ ।
ભીમં ચોગ્રમહાબલાતિવપુષં બાધાગણૈઃ સંયુતં
    ગોત્રં કાશ્યપજં સુરાષ્ટ્રવિભવં કાલાગ્નિદૈવં શનિમ્ ॥

વસ્ત્રૈઃ કૃષ્ણમયૈર્યુતં તનુવરં તં સૂર્યસૂનું ભજે ॥

હ્રીં ક્લીમ્ શનૈશ્ચરાય નમઃ ।

ૐ મહિષસ્થં કૃષ્ણં વદનમયવિભું કર્ણનાસાક્ષિમાત્રમ્
    કારાલાસ્યં ભીમં ગદવિભવયુતં શ્યામવર્ણં મહોગ્રમ્ ।
પૈઠીનં ગોત્રયુક્તં રવિશશીદમનં ચાધિદૈવં યમોઽપિ
    સર્પપ્રત્યધિદૈવતં મલયગીર્ભાવં તં તમસં નમામિ ॥

વં ઐં વં વં ક્લીં વં તમસે સ્વાહા ।

ૐ મહોગ્રં ધૂમાભં કરચરણયુતં છિન્નશીર્ષં સુદીપ્તમ્
    હસ્તે વાણં કૃપાણં ત્રિશિખશશિધૃતં વેદહસ્તં પ્રસન્નમ્ ।
બ્રહ્મા તસ્યાધિદૈવં સકલગદયુતં સર્પપ્રત્યધિદૈવં ધ્યાયેત્
    કેતું વિશાલં સકલસુરનરે શાન્તિદં પુષ્ટિદઞ્ચ ॥

શ્રીં શ્રીં આં વં રં લં કેતવે સ્વાહા ।

Encoded and proofread by Sanjay Rath srath@vsnl.com

Proofread KSR Ramachandran

*Navagraha dhyana mantra from Sadhu sankuli tantra*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*